श्रीसत्याभिनवतीर्थविरचिता

श्रीसत्यनाथगुरुस्तुतिः

स्वोपज्ञगुरुमाहात्म्यप्रकाशिकाव्याख्यानसहिता

सम्पादकः - पं. इटगी वेदव्यासाचार्यः

प्रकाशनम् -विश्वमध्वमहापरिषत्

विश्वमध्वमहापरिषत् ग्रन्थमाला - ६२

श्रीसत्याभिनवतीर्थविरचिता

श्रीसत्यनाथगुरुस्तुतिः

सोपज्ञगुरुमाहात्म्यप्रकाशिकाव्याख्यासमलङ्कृता

सम्पादकः

पं. इटगि वेदव्यासाचार्यः

प्रकाशनम्

श्रीमन्मध्वाचार्यमूलमहासंस्थानम्

श्रीउत्तरादिमठः

विश्वमध्वमहापरिषत्, बेंगळूरु - ४

Shree Satyanathagurustuti

by Sri Satyabhinavateertharu

A Work on Satyanathateerthaswamiji of Uttaradi Math

Edited by : **Pt. Vedavyasacharya Itagi**

Published by : Vishva Madhwa Maha Parishat

Copies : 1000

First Edition : February 2009

No.of Pages : 40

© : Reserved

Price. [In India] Rs. 10

Copies can be had from :

Vishva Madhwa Maha Parishat
Research Center, #11, 2nd Floor,
Uttaradimath Building. Uttaradi Math Road,
Shankarpuram, Basavanagudi
BANGALORE - 4 Phone : 080 26603692

Type Setting : VMMP Research Center

Cover Design : Gopalakrishna

Printed by :

VAGARTHA, 149, 8th Cross, N.R.Colony, Bangalore-4 Ph.22427677.



श्रीमज्जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानश्रीमदुत्तरादिमठाधीशानां

श्री श्री १००८ श्री सत्यात्मतीर्थानां

द्वादशवार्षिकपीठारोहणसमारम्भनिमित्तं समर्पितमिदं ग्रन्थकुसुमम्

|| ಶ್ರೀದಿಗ್ವಿಜಯರಾಮೋ ವಿಜಯತೇ ||

ಜಗದ್ಗುರು ಶ್ರೀಮನ್ಮಧ್ವಾಚಾರ್ಯಮೂಲಮಹಾಸಂಸ್ಥಾನ

ಶ್ರೀಮದುತ್ತರಾದಿಮಠಾಧೀಶರಾದ

ಶ್ರೀ ಶ್ರೀ 1008 ಶ್ರೀಸತ್ಯಾತ್ಮತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರ

ಅನುಗ್ರಹ ಸಂದೇಶ

ಪಿತಾ ಮಾತಾ ತಥಾ ಭ್ರಾತಾ ಸರ್ವೇ ಸಂಸಾರಹೇತವಃ ।
ಗುರುರೇಕಃ ಸದಾ ಸೇವ್ಯಃ ಸಂಸಾರೋದ್ಧರಣಕ್ಷಮಃ ॥

ತಂದೆ-ತಾಯಿ-ಅಣ್ಣ-ತಮ್ಮ-ಅಕ್ಕ-ತಂಗಿ ಮೊದಲಾದವರೆಲ್ಲರೂ ಸಂಸಾರಕ್ಕೆ ಕಾರಣರಾಗುತ್ತಾರೆ.

ತತ್ತ್ವಜ್ಞಾನವನ್ನು ನೀಡುವ ಮುಖಾಂತರ ಮುಕ್ತಿಗೆ ಕಾರಣೀಭೂತರಾಗುವವರು ಗುರುಗಳು ಮಾತ್ರ. ಇಂತಹ ಗುರುಗಳಿಗೆ ಸಮರಾದವರು ಪ್ರಪಂಚದಲ್ಲಿ ಮತ್ತಾರೂ ಇಲ್ಲ, ಇವರ ಋಣ ಮುಕ್ತಿಯಲ್ಲಿಯೂ ತೀರುವುದಿಲ್ಲ, ಇದು ಎಲ್ಲರಿಗೂ ತಿಳಿದಿರುವ ವಿಷಯವೇ ಆಗಿದೆ. ಆದರೆ ಈ ರೀತಿಯಾಗಿ ಭಾವಿಸಿ ಗುರುಗಳನ್ನು ಅನ್ಯಾದೃಶವಾದ ಶ್ರದ್ಧೆಯಿಂದ ಪೂಜಿಸುವವರು ವಿರಳ. ಆದರೆ ಈ ಭಾವನೆಯಿಂದ ಸದಾಯುಕ್ತರಾಗಿ ಗುರುಗಳನ್ನು ಸೇವಿಸಿದ ಮಹಾನುಭಾವರು ಶ್ರೀಸತ್ಯಾಭಿನವತೀರ್ಥಶ್ರೀಪಾದರು. ಇವರು ಶ್ರೀಸತ್ಯನಾಥರ ಶಿಷ್ಯರು. ಗುರುಗಳ ಮೇಲೆ ಶ್ರೀಸತ್ಯಾಭಿನವರು ಮಾಡುವ ಭಕ್ತಿ ಅನ್ಯಾದೃಶವಾಗಿದೆ. ಈ ಗುರುದೀಕ್ಷೆ ಎಲ್ಲ ಶಿಷ್ಯರಿಗೆ ಆದರ್ಶವಾಗಿದೆ. ಇದಕ್ಕೆ ಸಾಕ್ಷಿ ಈ ಗ್ರಂಥ. ಇದು ಗುರುಸ್ತೋತ್ರ. ಹಂಸನಾಮಕಭಗವಂತನ ಉತ್ತರಾದಿಮಠದ ಪೀಠವನ್ನಲಂಕರಿಸಿದ ಶ್ರೀಮದಾಚಾರ್ಯರನ್ನು ಮೊದಲು ಮಾಡಿ ತಮ್ಮ ಸಾಕ್ಷಾತ್ ಗುರುಗಳಾದ ಶ್ರೀಸತ್ಯನಾಥರ ವರೆಗಿನ ಎಲ್ಲ ಗುರುಗಳನ್ನು ಶ್ರದ್ಧಾದೀಕ್ಷಿತರಾಗಿ ಸ್ತುತಿಸಿದ್ದಾರೆ. ಮತ್ತು ಈ ಸ್ತುತಿಗೆ ತಮ್ಮದೇ ಆದ ವ್ಯಾಖ್ಯಾನದ ಮೂಲಕ ತಮ್ಮ ಹಾರ್ದವನ್ನು ತಾವೇ ಅಭಿವ್ಯಕ್ತಮಾಡುತ್ತಾ ಅತಿಅಪರೂಪವಾದ ಇತಿಹಾಸಗಳನ್ನು ಪ್ರಕಾಶಕ್ಕೆ ತಂದಿರುತ್ತಾರೆ.

ಗುರುಗಳ ಮೇಲೆ ಭಕ್ತಿಯನ್ನು ಮಾಡಲು ಬಯಸುವವರೆಲ್ಲರೂ ಈ ಸ್ತೋತ್ರವನ್ನು ನಿತ್ಯವೂ ಪಾರಾಯಣ ಮಾಡಲೇಬೇಕು. ಈ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿಯ ಅಪರೂಪವಾದ ಇತಿಹಾಸಗಳನ್ನು ತಿಳಿಯಲೇಬೇಕು.

ಇಂತಹ ಸುಂದರವಾದ ಗ್ರಂಥವನ್ನು ಶ್ರದ್ಧೆಯಿಂದ ಸಂಪಾದನೆ ಮಾಡಿ ನಮ್ಮ ಪ್ರಿಯಶಿಷ್ಯರಾದ ವೇದವ್ಯಾಸಾಚಾರ್ಯ ಇಟಗಿ ಇವರು ಶ್ರೀವೇದವ್ಯಾಸದೇವರ, ಶ್ರೀಮದಾಚಾರ್ಯರ ಸೇವೆಯನ್ನು ಮಾಡಿದ್ದಾರೆ. ಇದರಿಂದ ನಮಗೆ ವಿಶೇಷ ಸಂತೋಷವಾಗಿದೆ. ಇವರಿಗೆ ವಿಶೇಷವಾದ ಜ್ಞಾನವನ್ನು ನೀಡಲಿ ಎಂದು ನಮ್ಮ ಉಪಾಸ್ಯಮೂರ್ತಿಗಳಾದ ಶ್ರೀಮೂಲರಾಮ ದಿಗ್ವಿಜಯರಾಮ ವೇದವ್ಯಾಸ ದೇವರಲ್ಲಿ ಪ್ರಾರ್ಥಿಸುತ್ತೇವೆ.

ಇತ್ಯನೇಕ ನಾರಾಯಣ ಸ್ಮರಣೆಗಳು

ಸರ್ವಧಾರಿ, ಮಾಘ ಶುದ್ಧ
ಪಂಚಮೀ
31-1-2009

ಮುನ್ನುಡಿ

ಯಸ್ಯ ದೇವೇ ಪರಾ ಭಕ್ತಿಃ ಯಥಾ ದೇವೇ ತಥಾ ಗುರೌ ।
ತಸ್ಯೈತೇ ಕಥಿತಾ ಹ್ಯರ್ಥಾಃ ಪ್ರಕಾಶಂತೇ ಮಹಾತ್ಮನಃ ॥

ದೇವರ ಆರಾಧನೆಯಂತೆ ಗುರುಗಳ ಆರಾಧನೆಯೂ ತಾರಕವಾದ ತತ್ತ್ವಜ್ಞಾನಕ್ಕೆ ಕಾರಣವಾಗಿದೆ. ಸೇವೆಯಿಂದ ಪ್ರಸನ್ನರಾದ ಗುರುಗಳಿಂದ ಪಡೆದ ತತ್ತ್ವಜ್ಞಾನವೇ ಮೋಚಕವಾಗುತ್ತದೆ. ಆದ್ದರಿಂದ ಮುಮುಕ್ಷುಗಳಿಗೆಲ್ಲರಿಗೂ ಗುರುಸ್ಮೃತಿ ಅವಶ್ಯವಾಗಿದೆ.

ಗುರುಗಳನ್ನು ನಂಬಿ ನಡೆದವರ ಮೇಲೆ ದೇವರು ತೋರುವ ಕೃಪೆ ಅನಿತರಸಾಧಾರಣವಾಗಿದೆ. ಈ ವಿಷಯದಲ್ಲಿ ಶ್ರೀಸತ್ಯಾಭಿನವರು ಸಾಕ್ಷಿಗಳಾಗಿದ್ದಾರೆ. ತತ್ತ್ವಜ್ಞಾನದ ಸಂಪ್ರಾಪ್ತಿಗಾಗಿ ಶ್ರೀಸತ್ಯಾಭಿನವರು ತಮ್ಮ ಗುರುಗಳಾದ ಶ್ರೀಸತ್ಯನಾಥರ ಸ್ತುತಿಯನ್ನು ಈ ಗುರುಸ್ತೋತ್ರದ ಮೂಲಕ ಮಾಡಿರುತ್ತಾರೆ.

ಶ್ರೀಮದಾಚಾರ್ಯರಿಂದ ಪ್ರಾರಂಭಿಸಿ ಶ್ರೀಸತ್ಯನಾಥರ ವರೆಗೆ ಇರುವ ಹಂಸನಾಮಕಪೀಠವನ್ನಾಳಿದ ಎಲ್ಲ ಗುರುಗಳ ಸ್ತುತಿಯು ಇಲ್ಲಿ ಪ್ರಸ್ತುತವಾಗಿದೆ. ಎಲ್ಲ ಗುರುಗಳ ಸ್ತುತಿಯ ಜೊತೆಜೊತೆಗೆ ಶ್ರೀಸತ್ಯನಾಥರ ಸ್ತುತಿಯನ್ನೂ ಶ್ರೀಸತ್ಯಾಭಿನವರು ಮಾಡಿದ್ದಾರೆ. ಅವರ ವ್ಯಾಖ್ಯಾನದ ಮೂಲಕ ಈ ವಿಷಯವು ಸ್ಪಷ್ಟವಾಗುತ್ತದೆ. ಈ ವ್ಯಾಖ್ಯಾನದಲ್ಲಿ ಶ್ರೀಮನ್ಮೂಲರಾಮದೇವರ ಆಗಮನಪ್ರಕಾರ ಮತ್ತು ವ್ಯಾಸಮುಷ್ಟಿಗಳ ವಿಚಾರ ಮೊದಲಾದ ಅನೇಕ ಐತಿಹಾಸಿಕ ವಿಷಯಗಳನ್ನು ದಾಖಲಿಸಿದ್ದಾರೆ. ಇದಕ್ಕಾಗಿ ಸತ್ಯನಿಧಿವಿಲಾಸ ಮತ್ತು ಸತ್ಯನಾಥಾಭ್ಯುದಯ ಕಾವ್ಯಗಳನ್ನು ಉಲ್ಲೇಖಿಸುತ್ತಾರೆ. ಈ ದೃಷ್ಟಿಯಿಂದ ಈ ಗ್ರಂಥ ಅತಿ ಅಪರೂಪವಾಗಿದೆ.

ಇಂತಹ ಕೃತಿಯನ್ನು ಸಂಪಾದನೆ ಮಾಡುತ್ತಿರುವುದು ನನ್ನ ಸೌಭಾಗ್ಯವೆಂದು ನಾನು ತಿಳಿಯುತ್ತೇನೆ.

ಈ ಗ್ರಂಥವನ್ನು ಪ್ರಕಾಶಗೊಳಿಸಬೇಕೆಂಬ ಉದ್ದೇಶದಿಂದ ಶ್ರೀ1008ಶ್ರೀ ಸತ್ಯಾತ್ಮತೀರ್ಥಶ್ರೀಪಾದರು ನನಗೆ ಈ ಸ್ತೋತ್ರದ ಹಸ್ತಪ್ರತಿಯನ್ನು ಸಂಶೋಧನೆ ಮಾಡಲು ಆಜ್ಞೆ ಮಾಡಿದರು. ಈ ಗ್ರಂಥಕ್ಕೆ ಆಶೀರ್ವಚನವನ್ನು ನೀಡುವ ಮುಖಾಂತರ ಅನುಗ್ರಹಿಸಿದರು. ಅವರ ಅಡಿದಾವರೆಗಳಲ್ಲಿ ಅನಂತಾನಂತ ಶಿರಸಾಷ್ಟಾಂಗಪ್ರಣಾಮಗಳನ್ನು ಸಮರ್ಪಿಸುತ್ತೇನೆ.

ನನಗೆ ವಿದ್ಯೋಪದೇಶವನ್ನು ಮಾಡಿ ಗುರುಭಕ್ತಿ ವಿಷ್ಣುಭಕ್ತ್ಯಾದಿಗಳನ್ನು ಉಪದೇಶಿಸಿದ ನನ್ನ ಸ್ವರೂಪೋದ್ಧಾರಕರಾದ ಮಹಾಹುಲೀ ಆಚಾರ್ಯರ (ಪಂ.ವಿದ್ಯಾಸಿಂಹಾಚಾರ್ಯ ಮಾಹುಲೀ) ಪಾದಗಳಲ್ಲಿ ಅನಂತ ಶಿರಸಾಷ್ಟಾಂಗ ನತಿಗಳನ್ನು ಅರ್ಪಿಸುತ್ತೇನೆ.

ಮತ್ತು ಇದರ ಹಸ್ತಪ್ರತಿಯನ್ನು ನೀಡಿದ ಪಂ. ಪ್ರಭಂಜನಾಚಾರ್ಯರಿಗೆ ಹಾಗೂ ಈ ಹಸ್ತಪ್ರತಿಯ ಸಂಶೋಧನೆಯಲ್ಲಿ ನನಗೆ ಮಾರ್ಗದರ್ಶನ ಮಾಡಿದ ಪಂ.ವಾದಿರಾಜಾಚಾರ್ಯ ಕರಣಂ ಇವರಿಗೂ ಆದರಪೂರ್ವಕವಾಗಿ ನಮಸ್ಕರಿಸುತ್ತೇನೆ.

ಗುರುಗಳ ಆಶೀರ್ವಾದ ನಿರಂತರ ಇದೇ ರೀತಿಯಾಗಿ ನನ್ನ ಮೇಲಿರಲಿ ಎಂದು ಅವರನ್ನು ಪ್ರಾರ್ಥಿಸುತ್ತೇನೆ. ಮತ್ತು ಈ ಗ್ರಂಥವು ಅಚ್ಚುಕಟ್ಟಾಗುವಂತೆ ಜೋಡಣೆ ಮಾಡಿದ ಪಂ. ಮಹಿದಾಸಾಚಾರ್ಯ ಜೋಷಿ ಇವರಿಗೆ, ಸುಂದರವಾಗಿ ಮುಖಪುಟವಿನ್ಯಾಸಮಾಡಿದ ಗೋಪಾಲಕೃಷ್ಣ ಇವರಿಗೆ ಆದರಪೂರ್ವಕ ಕೃತಜ್ಞತೆಗಳು. ಮತ್ತು ಸಕಾಲಕ್ಕೆ ಓರಣವಾಗಿ ಮುದ್ರಿಸಿದ ವಾಗರ್ಥ ಮುದ್ರಣಾಲಯದವರಿಗೆ ಕೃತಜ್ಞತೆಗಳು.

ಇದರಲ್ಲಿರುವ ನನ್ನ ತಪ್ಪುಗಳನ್ನು ಸಹಿಸಿ ಹರಿಸಬೇಕೆಂದು ಸುಜನರಲ್ಲಿ ಸವಿನಯವಾಗಿ ಪ್ರಾರ್ಥಿಸುತ್ತೇನೆ.

ವೇದವ್ಯಾಸಾಚಾರ್ಯ ಇಟಗಿ

ಪ್ರಕಾಶಕರ ನುಡಿ

ಶ್ರೀ 1008 ಶ್ರೀ ಸತ್ಯಪ್ರಮೋದತೀರ್ಥಶ್ರೀಪಾದಂಗಳವರ ಮಹದಪೇಕ್ಷೆಯಂತೆ ಪ್ರಾಚೀನಗ್ರಂಥಗಳ ಸಂರಕ್ಷಣೆ ಹಾಗೂ ಅವುಗಳ ಸಂಶೋಧನ, ಪ್ರಕಾಶನ ಮೊದಲಾದ ಅನೇಕ ಉನ್ನತಮಟ್ಟದ ಉದ್ದೇಶಗಳಿಂದ ಶ್ರೀ 1008 ಶ್ರೀ ಸತ್ಯಾತ್ಮತೀರ್ಥ ಶ್ರೀಪಾದಂಗಳವರಿಂದ ಸಂಸ್ಥಾಪಿತವಾದ ಸಂಸ್ಥೆ "ವಿಶ್ವಮಧ್ವಮಹಾಪರಿಷತ್"

ನಮ್ಮ ಸಂಸ್ಥೆಯು ಪ್ರಾಚೀನವಾದ, ಅಪ್ರಕಟಿತವಾದ ಗ್ರಂಥಗಳನ್ನು ವಿದ್ವಾಂಸರಿಂದ ಸಂಶೋಧನೆ ಮಾಡಿಸಿ ಅವುಗಳನ್ನು ಪ್ರಕಾಶಿಸುವ ಮಹತ್ತರ ಧ್ಯೇಯವನ್ನು ಹೊಂದಿದೆ. ಈ ದೃಷ್ಟಿಯಲ್ಲಿ ವಿದ್ವಾಂಸರಿಗೆ, ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ಉಪಯುಕ್ತವಾದ ಅನೇಕ ಮಹತ್ವದ ಗ್ರಂಥಗಳನ್ನು ಅನೇಕ ಟೀಕಾ-ಟಿಪ್ಪಣಿಗಳೊಂದಿಗೆ ಪ್ರಕಾಶಿಸಿದೆ. ಇದಲ್ಲದೇ ಜನರಲ್ಲಿ ಧರ್ಮಜಾಗೃತಿಗಾಗಿ ಪ್ರಶ್ನೋತ್ತರರೂಪದಲ್ಲಿ ಹಾಗೂ ಪ್ರವಚನರೂಪದಲ್ಲಿ ಅನೇಕ ಉಪಯುಕ್ತ ಪುಸ್ತಕಗಳನ್ನು ಈಗಾಗಲೇ ಹೊರತರಲಾಗಿದೆ. ಸಂಸ್ಕೃತ-ಕನ್ನಡ-ತೆಲುಗು-ತಮಿಳು ಹಾಗೂ ಆಂಗ್ಲ ಮೊದಲಾದ ಭಾಷೆಗಳಲ್ಲಿ ಸಂಸ್ಥೆಯಿಂದ ಅನೇಕ ಗ್ರಂಥಗಳು ಪ್ರಕಾಶಿತವಾಗಿವೆ.

ಪ್ರಕೃತ ಶ್ರೀಸತ್ಯಾಭಿನವರಿಂದ ರಚಿತವಾದ "ಗುರುಸ್ತೋತ್ರವು" ಅವರದೇ ಆದ ವ್ಯಾಖ್ಯಾನದಿಂದ ಸಹಿತವಾಗಿ ಹೊರಬರುತ್ತಿದೆ. ಇದನ್ನು ಸಂಪಾದನೆ ಮಾಡಿದ ಪಂ. ವೇದವ್ಯಾಸಾಚಾರ್ಯ ಇಟಗಿ ಇವರಿಗೆ ಸುಂದರವಾಗಿ ಮುದ್ರಣಮಾಡಿದ ವಾಗರ್ಥಮುದ್ರಣಾಲಯದವರಿಗೆ ಧನ್ಯವಾದಗಳು.

ಪ್ರಧಾನ ಕಾರ್ಯದರ್ಶಿಗಳು
ವಿಶ್ವಮಧ್ವಮಹಾಪರಿಷತ್, ಉತ್ತರಾದಿಮಠ
ಬಸವನಗುಡಿ ಬೆಂಗಳೂರು - 4

।। श्रीशं वन्दे ।। श्रीगुरुभ्यो नमः ।।
।। श्रीवेदव्यासाय नमः ।।

सत्याभिनवतीर्थविरचितसत्यनाथगुरुस्तुतिः

रघुनाथ सदा पाहि रघुनाथगृहोद्भव ।
रघुनाथकृपायातरघुनाथपदाश्रय ।। १ ।।

सत्याभिनवतीर्थविरचितगुरुमाहात्म्यप्रकाशिका

नत्वा हरिं सर्वगुरून् सत्यनाथगुरूंस्तथा ।
सत्यनाथगुरुस्तोत्रं व्याकरिष्ये यथामति ।।

भगवज्ज्ञानार्थं गुरुस्तुतिरवश्यं कर्तव्या। अतः श्रीसत्यनाथगुरूणां तद्गुरु(परमा)चार्यादीनां स्तुतिं चिकीर्षुः श्रीसत्यनाथश्रीचरणशिष्यः सत्याभिनवयतिः रामचन्द्रस्तुतिरूपं मङ्गलं स्वयमनुष्ठाय लोकशिक्षार्थ-मादौ निबध्नाति- **रघुनाथेति ।। रघुनाथगृहोद्भवेति** ।। रघुनाथेति सीताया अप्युपलक्षकम्। सीताप्रतिमासहितमूलरामप्रतिमायुक्त-दशरथराजगृहे उद्भवः अवतारः यस्य सः रघुनाथगृहोद्भवः तस्य सम्बुद्धिः हे रघुनाथगृहोद्भव । रघुनाथकृपायातरघुनाथपदाश्रय। रघुनाथस्य कृपा रघुनाथकृपा रघुनाथकृपया आयातः रघुनाथः रघुनाथप्रतिमा येषां ते श्रीमदाचार्याः रघुनाथकृपायातरघुनाथाः रघुनाथकृपायातरघुनाथानां पदं स्थानं येषां ते श्रीसत्यनाथस्वामिनो रघुनाथकृपायातरघुनाथपदाः तेषामाश्रय हे रघुनाथ सदाऽस्मान् पाहि। 'रघुनाथगृहोद्भव' इत्यनेन-

इक्ष्वाकुलब्धं तपसा विधातुरर्चाधनं रामपदाङ्कितं यत्।
कुलागतस्यास्य चकार नाम्ना रामं पिता पंक्तिरथः सुतं तम्।।(१.२)

इति सत्यनिधिविलासोक्तं मूलराममाहात्म्यं सूचितम्। 'रघुनाथ-कृपायातरघुनाथपदाश्रय' इत्यनेन-

विरक्तं कञ्चनासन्नमन्तेवासिनमात्मनः।
आनन्दतीर्थो विदधे नाम्ना नरहरिं यतिम् ।।

सख्ये विप्राय रामो यामर्चां दाशरथीमदात्।
तामानीय प्राप्तराज्यो मह्यं देहीति चाब्रवीत् ।।

अनवज्ञाय गुर्वाज्ञां स भिक्षुः पर्यटन् महीम्।
ऐतिह्यमश्रुणोत् क्षेत्रे पुरुषोत्तमसंज्ञके ।।

मुकुन्दवर्मा भूपालः पुरासीदुत्कलाधिपः ।
भुजाद्रिमथितारातिसिन्धूद्यच्छ्रीस्वयंवृतः ।।

अश्रान्तकमलाकान्तसेवाश्रान्तमना नृपः ।
जगन्नाथं गन्तुकामः प्रजिघाय पुरोधसम् ।।

प्रहितःपुरतो राज्ञा परिज्ञानाय स द्विजः ।
अभिज्ञाय हरेः क्षेत्रं दृष्टं तस्मै न्यवेदयत् ।।

प्रस्थिते नृपतौ तस्मिन् सानीके तद्दिदृक्षया।
तदैव तदभूद्भूरि पांसुसम्पातपूरितम् ।।

अलब्धकामं राजानं खिद्यमानं तमध्वनि।
गन्धर्वः कोऽपि वचनैः बोधयामास साधुभिः ।।

रघुवीरेण विप्राय दत्तामर्चां प्रपद्यताम्।
अर्चयंस्तस्य देवस्य प्रसादमुपयास्यसि ।।

इत्युक्तो राजतिलको गन्धर्वेण स बन्धुवत्।
उपाचरद् रामसखं विप्रं विषयवासिनम् ।।

भक्ताय राज्ञे तामर्चामचर्च्यं यच्छति स्म सः ।
आससाद प्रसादश्च नृपस्तामर्चयन् हरेः ।।

तदन्ववायजातानां साऽर्चा निधिरिवाभवत् ।
मणिपिञ्जरमञ्जूषापञ्जरान्तरपूजिता ।।

अथ काले समुद्वेलपारावारपराहतम् ।
तद्राष्ट्रमभवन्नष्टं पांसुच्छन्नं युगात्यये ।।

तत्र नानाजनाकीर्णं राष्ट्रमुत्पाद्य नूतनम् ।
सुधन्वाख्यो बहोः कालात् तद्वंश्योऽपालयद् भुवम् ।।

मूर्धाभिषिक्तैस्तद्वंश्यैरुपभुक्तां वसुन्धराम् ।
पालयन्नद्य सुयशा राजास्ते दिग्जयोद्यतः ।।

इत्यैतिह्यं जनमुखात् श्रुण्वन् नरहरिः क्षमी ।
उवास तत्र स चिरं गुर्वर्थं साधयन्निव ।।

तस्मिन् राष्ट्रे परिव्राजि वसत्यद्भुतविक्रमः ।
सुयशाः प्रस्थितो जेतुं पाश्चात्यैर्यवनैर्हतः ।।

अराजके तदा राष्ट्रे मन्त्रिणो ये विचक्षणाः ।
ते राजवरणायादुरौपवाह्यकरे स्रजम् ।।

स भ्रमन् परितो हस्ती पश्यन्नरहरिं यतिम् ।
आमुच्य कण्ठे तां मालां वहन् भद्रासने न्यधात् ।।

प्राप्तराज्यः स यतिराट् गन्तुं पावकमुद्यताम् ।
न्यषेधद् राजमहिषीमन्तर्वत्नीं विभावयन् ।।

तस्मिन् रक्षति गां भिक्षौ काले राज्ञी पतिव्रता ।
असूत तनयं दीप्तं विभावसुमिवारणिः ।।

वर्धमानं सुशर्माणं पश्यन् राजसुतं मुनिः ।
अकरोद् द्वादशसमा राज्यं प्राज्यपराक्रमः ।।

दत्वा सुशर्मणे राज्यमुद्यद्यौवनशालिने।
ऐच्छद् गन्तुं स कर्मन्दी मुक्तसाम्राज्यबन्धनः॥

अनपेक्षं राज्यलक्ष्म्यां तं भिक्षुं वीक्ष्य भूमिपः।
केनापि संयोजयितुमिष्टार्थेनाभ्ययाचत॥

तिरोहितां स मञ्जूषां रामार्चां ध्यानदर्शिताम्।
विभावयन् सोऽर्थमिष्टं वव्रे तामेव याचितः॥

सीताभिरामां रामार्चां गृह्णन्नर्चान्तरास्पृहः।
राज्ञानुमोदितो मौनी गुरवे प्रत्यपादयत्॥

शिष्योपनीतां तामर्चां स वाय्वंशो महामुनिः।
समानर्चार्चकतपोयोगाप्याधिकसन्निधिम्॥ इति (२.४५-७२)

सत्यनिधिविलासोक्तं मूलरामागमनप्रकारं सूचयति। यैर्नरहरितीर्थैः सीतासहितमूलराममानीयाचार्येभ्यः समर्पणं कृतम्। तैरेव नरहरितीर्थैः पद्मनाभतीर्थानन्तरं संस्थानं कृतम्। 'विरक्तं कञ्चनासन्नम्' इत्यत्र कञ्चनेत्युक्तिः लोकविलक्षणत्वाभिप्रायेणेति द्रष्टव्यम्॥ १॥

वेङ्कटेश सदा देहि वेङ्कटेशपदार्चनम्।
वेङ्कटेशसदाध्यातवेङ्कटेशगुरुप्रिय॥ २॥

वेङ्कटेशप्रसादेन यथा लौकिकपुरुषार्थावाप्तिस्तथा अलौकिक-गुर्वनुग्रहलक्षणमहापुरुषार्थावाप्तिश्च भवति। अतः वेङ्कटेशप्रार्थनरूप-मङ्गलमनुष्ठाय लोकशिक्षार्थं निबध्नाति- **वेङ्कटेशेति॥** वेङ्कटेश वेङ्कटाचलेश। सदाध्यातवेङ्कटेशगुरुप्रिय सदाध्यातः वेङ्कटेशः यैस्ते सदाध्यातवेङ्कटेशाः सदाध्यातवेङ्कटेशाश्च ते गुरवो जगद्गुरवश्च सदाध्यातवेङ्कटेशगुरवः श्रीसत्यनाथस्वामिनस्त एव प्रिया यस्य तस्य सम्बुद्धिः सदाध्यातवेङ्कटेशगुरुप्रिय वेङ्कटेश! सदा वेङ्कटेशपदार्चनं

वेङ्कटेशपादपूजनम्। देहि। अनेन हे वेङ्कटेश सत्यनाथस्वामिषु तव दया वर्तते। अहं तु तेषां दयापात्रमतो मयि दया कर्तव्येत्युक्तं भवति।।२।।

पूर्णबोधगुरुं वन्दे पूर्णभाष्यादिकारिणम्।
पूर्णानन्दपदासक्तं पूर्णमद्गुरुपूजितम्।। ३ ।।

आदिगुरुं श्रीमदाचार्यं स्तौति- **पूर्णबोधेति**।। पूर्णभाष्यादि-कारिणम् । आदिपदेन तात्पर्यादिग्रहणम्। सम्पूर्णभाष्यतात्पर्यादि-ग्रन्थकारिणम् । पूर्णानन्दपदासक्तं पूर्णानन्दो भगवान् तत्पदयोरासक्तम्। पूर्णमद्गुरुपूजितं ज्ञानादिपूर्णाः ये मद्गुरवः सत्यनाथस्वामिनस्तैः पूजितम्। पूर्णबोधगुरुं यः सर्वज्ञः शङ्करादिजगद्गुरुः तं श्रीमदाचार्यं वन्दे। 'पूर्णबोधगुरुम्' इत्यादिभिः बळित्थेत्यादिश्रुतिप्रतिपाद्यम्-

हनुशब्दो ज्ञानवाची हनूमान् मतिशब्दितः।
रामस्य स्वृतरूपस्य वाचस्तेनानयन्त हि।।

भृतमो भीम इत्युक्तो वाचो मा मातरः स्मृताः।
ऋगाद्या इतिहासश्च पुराणं पञ्चरात्रकम्।।

प्रोक्ताः सप्तशिवास्तत्र शयो भीमस्ततः स्मृतः।
मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम्।
मध्व आनन्दतीर्थः स्यात् तृतीया मारुती तनुः।।

इति सूक्तगतं रूपत्रयमेतन्महात्मनः।
यो वेद वेदवित्सः स्यात् तत्त्ववित् तत्प्रसादतः। इति च।

साधको रामवाक्यानां तत्समीपगतः सदा।
हनूमान् प्रथमो ज्ञेयो भीमस्तु बहुभुक् पितोः।।

पृतनक्षयकारी च द्वितीयस्तु तृतीयकः।
पूर्णप्रज्ञस्तथाऽऽनन्दतीर्थनामा प्रकीर्तितः।।

दशेति सर्वमुद्दिष्टं सर्वं पूर्णमिहोच्यते।
प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः।।

आ समन्तात् पतित्वे तु गूढं कलियुगे हरिम्।
असत्यमप्रतिष्ठं च जगदेतदनीश्वरम्।।

वदद्भिर्गूहितं सन्तं तृतीयोऽसुर्मथायति।
येन विष्णोस्तु वर्णाख्यान् गुणानज्ञासिषुः परान्।।

ईशानासः सूरयश्च निगूढान्निर्गुणोक्तिभिः।
त्रेतायां द्वापरे चैव कलौ चैते क्रमात् त्रयः।।
एतेषां परमो विष्णुर्नेता सर्वेश्वरेश्वरः।
स्वयम्भुब्रह्मसञ्ज्ञोऽसौ परोऽस्मै ब्रह्मणे नमः।।

इति च ।। (बृ.भा.८.५.)

इत्यादिबळित्थेत्यादिश्रुतिव्याख्यानरूपस्मृतिप्रतिपाद्यं च सर्वं श्रीमदाचार्यमाहात्म्यं सूचयति। बहुभुक् पितोः इत्यत्र पितोः इत्यस्य अन्नस्येत्यर्थः। ईशानास इत्यत्र बहुवचनमाद्यर्थे। रुद्रेन्द्राद्या इत्यर्थः। 'पूर्णभाष्यादिकारिणम्' इत्यनेनाचार्यकृतभाष्यादीनां पूर्णत्वोक्त्या ऋग्भाष्यमपूर्णमिति शङ्का परास्ता। मार्गप्रदर्शनेन सम्पूर्णऋग्व्याख्यानस्य कृतत्वात्। अत एव श्रीमदाचार्यैः 'प्रसिद्धं धनमेव हि'(ऋ.भा.३.४०.८) इति हि शब्देन अनेन मार्गेणोत्तरस्यापि मन्त्रजातस्य व्याख्यानं प्रसिद्धमेवेत्युक्तम्। एतदेवाभिप्रेत्य जयतीर्थस्वामिभिः "अनेन मार्गेणोत्तरस्यापि मन्त्रजातस्य व्याख्यानं प्रसिद्धमेवात उपरम्यत इति हि शब्देनाचष्टे भगवानान्दतीर्थमुनिः" इत्युक्तम्।। १ ।।

पद्मनाभमुनिं नौमि पद्मनाभार्चकं सदा।
पद्मनाभग्रन्थकारपद्माक्षेशप्रसादतः।।४।।

द्वितीयगुरुं पद्मनाभतीर्थश्रीपादं स्तौति- **पद्मनाभमुनिमिति**।। पद्मनाभग्रन्थकारपद्माक्षेशप्रसादतः नारायणमाहात्म्यप्रतिपादका ये ग्रन्था सत्तर्कदीपावलिसन्न्यायरत्नावल्यादयः तान्करोतीति पद्मनाभ-ग्रन्थकारः। पद्मसदृशाक्षत्वात् पद्माक्षः पद्मनाभग्रन्थकारश्चासौ पद्माक्षश्च पद्मनाभग्रन्थकारपद्माक्षः पद्मनाभतीर्थश्रीपादः स एव ईशः स्वामी येषां ते श्रीसत्यनाथस्वामिनः पद्मनाभग्रन्थकारपद्माक्षेशास्तेषां प्रसादतः पद्मनाभार्चकं मूलरामाद्यष्टप्रतिमार्चकं पद्मनाभमुनिं सदा नौमि। 'पद्मनाभग्रन्थकार' इत्यनेन

यो भाष्यराजाय गुरूदिताय सत्तर्कदिपावलिमाजहार।
स पद्मनाभाख्यमुनिः प्रपेदे कर्मन्दिसाम्राज्यमुदारकीर्तिः।।

सन्न्यायरत्नावलिसञ्ज्ञितां यां कृतिं कृती मौनिवरश्चकार।
तस्या विशेषाननुपात्तदोषान् किं वा जनो वेत्ति जगत्यशेषः।।

(३.२-४.)

इति सत्यनिधिविलासोक्तं पद्मनाभतीर्थश्रीपादमाहात्म्यं सूचयति। अत्र सत्तर्कदीपावलिसन्न्यायरत्नावलिशब्दौ तत्कृतग्रन्थान्तरोपलक्षकौ। 'पद्मानाभार्चकम्' इत्यनेन-

मूलरघुनाथमूर्तिं सीतां व्यासाभिधाः पञ्च शिलाः।
दिग्विजयराममूर्तिं सोऽष्टौ भूतीरिवापदाचार्यात् ।। (३.५)

इति सत्यनिधिविलासोक्तं माहात्म्यं सूचयति ।।२।।

गुरुं नरहरिं सेवे गुरुपादप्रभावजम्।
गुरुश्रीसत्यनाथेन्द्रगुरुश्रीपादशेखरम् ।।३।।

तृतीयगुरुं नरहरितीर्थश्रीपादं स्तौति- **गुरुं नरहरिमिति**।। गुरुपादप्रभावजं गुरुस्वरूपश्रीमदाचार्यप्रभावादुत्पन्नम्। गुरुश्रीसत्यनाथेन्द्र

गुरुश्रीपादशेखरम्। गुरवश्च ते श्रीसत्यनाथस्वामिनश्च गुरुश्रीसत्यनाथेन्द्रास्तेषां गुरुः गुरुश्रीसत्यनाथेन्द्रगुरुः गुरुश्रीसत्यनाथेन्द्रगुरुश्चासौ श्रीपादशेखरश्च गुरुश्रीसत्यनाथेन्द्रगुरुश्रीपादशेखरस्तम्। गुरुं जगद्गुरुम् । नरहरिं नरहरितीर्थश्रीपादं सेवे। सर्वगुरूणामाचार्यप्रभावजत्वेऽपि आचार्याज्ञया पुरुषोत्तमक्षेत्रं गत्वा, द्वादशवर्षपर्यन्तं साम्राज्यं कृत्वा, सीतासमेतमूलरामं सम्पाद्याचार्याय दत्वा, पद्मनाभतीर्थानन्तरं सीतासमेतमूलरामदिग्विजयरामपञ्चवेदव्यासपूजनादिमहासाम्राज्यं कृतमिति माहात्म्यविशेषसूचनार्थं गुरुपादप्रभावजमिति विशिष्योक्तम्।।३।।

माधवेशमहं यामि माधवेशानुवर्तिनम्।
माधवेशकृपादृष्टिर्माधवेशप्रभावतः ।।४।।

चतुर्थगुरुं माधवेशश्रीपादं स्तौति- **माधवेशमिति**।। माधवेशप्रभावतः माधवतीर्थो ईशः स्वामी येषां ते श्रीसत्यनाथस्वामिनः माधवेशास्तेषां प्रभावतः माधवेशकृपादृष्टिर्माधवतीर्थस्वामिनां कृपादृष्टिर्यस्य स माधवेशकृपादृष्टिरहं माधवेशानुवर्तिनं माधवेशः वंशरामचन्द्ररूपमाधवस्वामी अनुवर्ती यस्य तं माधवेशानुवर्तिनम्। वंशरामचन्द्रप्रतिष्ठापकमिति यावत्। माधवेशं माधवतीर्थस्वामिनं शरणं यामि। 'माधवेशानुवर्तिनम्' इत्यनेन

ततो महान् माधवतीर्थनामा राज्यं गुरोः पूज्यतरं प्रपेदे।
येन प्रतिष्ठापितराममूर्तिर्वंशेति कीर्तिं प्रययौ जगत्याम्।।
(३.७) इति

सत्यनिधिविलासोक्तमाधवतीर्थमाहात्म्यं सूचयति।। ४।।

सदाऽक्षोभ्यमुने पाहि सदाऽक्षोभ्यजगद्गुरो।
सदाऽक्षोभ्यकुवादीन्द्र सदाऽक्षोभ्येशभावित।।५।।

पञ्चमगुरुमक्षोभ्यतीर्थश्रीपादं स्तौति- **सदाऽक्षोभ्येति ॥** सदाऽक्षोभ्यजगद्गुरो सद्भिः जनैः आ सम्यक् परित्यागादिना क्षोभ्यं ब्रह्महत्यादिकारि यज्जगत् तस्य गुरो शङ्खोदकदानेनोद्धारक। सदाऽक्षोभ्यकुवादीन्द्र सदा निरन्तरं आ सम्यक् क्षोभ्यः सदाक्षोभ्यः कुवादीन्द्रः दुर्वादिश्रेष्ठः उत्तमारण्यो येन सः सदाक्षोभ्यकुवादीन्द्रः तस्य सम्बुद्धिः सदाक्षोभ्यकुवादीन्द्र। सदाऽक्षोभ्येशभावित । सदा नित्यं कुवादिभिरक्षोभ्याः सत्यनाथस्वामिनस्तेषामीशः स्वामी प्रसन्नविठ्ठलः स भावितः सम्भावितः प्रतिष्ठापितो येन सदाऽक्षोभ्येशभावितस्तस्य सम्बुद्धिः सदाक्षोभ्येशभावित हे अक्षोभ्येशमुने अक्षोभ्यनामकमुने सदा पाहि। यद्यपि मूलरामादयोऽपि श्रीसत्यनाथस्वामिनां स्वामिनो भवन्ति तथापि श्रीसत्यनाथस्वामिभिः पूर्वापेक्षया अतिशयेनात्युत्तमरत्नकवच-किरीटादिभिः प्रसन्नविठ्ठलपूजा कृतेति विशेषसूचनार्थं सत्यनाथ-स्वामिनां प्रसन्नविठ्ठलः स्वामीति विशिष्योक्तम्। 'अक्षोभ्यमुने' इत्यनेन

अक्षोभ्यस्तपसि रतस्ततो विपक्षैरक्षोभ्यं यतिकुलराज्यमाददानः।
शिक्षार्थं जगति चचार दैत्यमायाभिक्षूणां प्रकटितवादजैत्रयात्रे ॥

(३.८) इति

सत्यनिधिविलासोक्तं माहात्म्यं प्रकटयति। 'सदाक्षोभ्यजगद्गुरो' इत्यनेन

अन्यानिवार्यनीलं चैलं येनाकरोद्विमलम्।
स द्विजहत्यादूनं शुद्धं शङ्खाम्बुना तेन ॥ इति

सत्यनिधिविलसोक्ताक्षोभ्यतीर्थस्वामिमाहात्म्यं सूचयति। द्विजहत्यादूनशब्दः सुरापानादिदूनोपलक्षकः। 'सदाक्षोभ्यकुवादीन्द्र' इत्यनेन

मिथ्यावादीभसंसत्प्रकटितवचनाटोपसिंहस्वनस्य
क्षोणीशद्वारदेशोद्व्युषितनिजजयापूरिताशान्तरस्य ।
अक्षोभ्याख्यस्य भिक्षोः प्रथयति जयितामुत्तमारण्यवादे
वेदान्ताचार्यनाम्ना विरचितजयपद्यात्मकोऽयं निबन्धः ।।
असिना तत्त्वमसिना परजीवप्रभेदिना ।
अवैदिकोत्तमारण्यमक्षोभ्यमुनिरच्छिनत् ।।(३.९,१०) इति

सत्यनिधिविलासोक्तमाहात्म्यं ज्ञापयति। 'सदाक्षोभ्येशभावित' इत्यनेन

प्रसन्नविठ्ठलाभिधां विधाय मूर्तिमूर्जिताम् ।
अपूजयत् स पूजकप्रसादकृत्स्मितोज्वलाम् ।।(३.१२)इति

सत्यनिधिविलोसोक्तप्रसन्नविठ्ठलप्रतिष्ठापकत्वरूपमाहात्म्यं प्रतिपादयति ।। ५ ।।

जयतीर्थगुरो रक्ष जयतीर्थ कृपाकर ।
जयतीर्थसुधापानजयतीर्थगुरुस्तुत ।। ६ ।।

षष्ठगुरुं जयतीर्थश्रीपादराजं स्तौति- **जयतीर्थगुरो इति ।।** जयतीर्थ जयप्रदानि शास्त्राणि यस्मात् स जयतीर्थस्तस्य सम्बुद्धिः जयतीर्थ । कृपाकर जयतीर्थसुधापानजयतीर्थगुरुस्तुत। जयतीर्थ-स्वामिकृता या सुधा तस्या पानं येषां ते जयतीर्थसुधापानाः, जयप्रदाभिनवचन्द्रिकादिशास्त्रकर्तृत्वात् जयतीर्थाः। जयतीर्थसुधापानाश्च ते जयतीर्थाश्च जयतीर्थसुधापानजयतीर्थाः सत्यनाथस्वामिनस्तैः तद्गुरुभिः श्रीसत्यनिध्यादिस्वामिभिश्च स्तुत जयतीर्थगुरो रक्ष। अनेन-

ततस्ततो योऽधिगतान्तिमाश्रमः समस्तशास्त्रेषु मुहुः कृतश्रमः ।
समध्वशास्त्राब्धिविहारबन्धुरो रराज लोके जयतीर्थसिन्धुरः।

मिथो विशेषो न विदां बभूव विद्याप्रतीते जयतीर्थभिक्षौ।
खद्योतताराग्रहदीधितीनां प्रद्योतने जाग्रति को विशेषः।।
विदधति विबुधेभ्यो रोचमानाः सुधाद्याः
कृतय इह जगत्यां याः सुधासाम्यलक्ष्मीम्।
जयमुनिरचितानां माधुरीधूर्वहानां
कथमिव महिमानं वर्णयामः कृतीनाम्।।(३.१३-१५)इति

सत्यनिधिविलासप्रतिपाद्यश्रीजयतीर्थस्वामिमाहात्म्यं प्रकाशयति। सिन्धुरो गजः। रुच्यर्थानां प्रीयमाण (सि.कौ.१.४.३३) इत्यनेन विबुधेभ्य इति चतुर्थी।। ६।।

विद्याधिराजं राजेन्द्रं विद्याधिकमहं भजे।
विद्याधिकछात्रयुक्तं विद्याधीशगुरुप्रियम्।। ७।।

सप्तमगुरुं विद्याधिराजस्वामिराजं स्तौति- **विद्याधिराजमिति।।** अहं राजेन्द्रं राज्ञां स्वामिनम्। महाराजमिति यावत्। विद्याधिकं विद्याधिकछात्रयुक्तम्। विद्याधीशगुरुप्रियं विद्या विद्याधिदेवता महालक्ष्मीः अधीशा येषां ते विद्याधीशाः विद्यापूर्णा इति यावत्। एवंभूता ये गुरवः श्रीसत्यनाथगुरवस्तेषां गुरुत्वेन प्रियं विद्याधिराजं भजे। राजेन्द्रं विद्याधिकमिति विशेषणद्वयेन मुख्यामुख्यन्यायेन राजशब्दो महाराजपरः। विद्याधिशब्दो विद्याधिक्यवाचकः विद्ययाधिकत्वान्महाराजत्वाद् विद्याधिराज इति विद्याधिराजशब्दार्थ उक्तो भवति। विद्याधिकत्वोपपादनार्थं विद्याधिकछात्रयुक्तं विद्याधीशगुरुप्रियमिति विशेषणद्वयम्।। ७।।

कवीन्द्रः पातु योगीन्द्रः कवीन्द्राधिपतिर्गुरुः।
कवीन्द्रसत्यनाथेन्द्रकवीन्द्राराध्यसत्पदः।।

अष्टमगुरुं कवीन्द्रस्वामिनं स्तौति- **कवीन्द्र इति**।। कवीन्द्रः पातु। कवीन्द्रशब्दोक्तज्ञानिश्रेष्ठत्वे हेतुमाह- **योगीन्द्र इति**।। योगिनां श्रेष्ठः, योगिनोऽपि कवीन्द्रा भवन्ति किमु योगिनां श्रेष्ठ इति भावः। ज्ञानिश्रेष्ठत्वे हेत्वन्तरमाह- **कवीन्द्राधिपतिरिति**।। भूमण्डलस्थ-कवीन्द्रणां मुख्यस्वामी, मुख्यस्वामित्वञ्च न अन्नदानादिमात्रेण किन्तु तत्त्वोपदेशेनापीति भावेनाह- **गुरुरिति**।। गुरुस्तत्त्वोपदेष्टा। भूमण्डल-स्थकवीन्द्राणां कवीन्द्रत्वं कवीन्द्रस्वाम्यधीनमित्येतदुपपादयति- **कवीन्द्रेति**।। कवीन्द्रसत्यनाथेन्द्र- कवीन्द्राराध्यसत्पदः, (कवीन्द्राः ये सत्यनाथाः सत्यनाथस्वामिनस्तैः सत्यनाथाः सत्यनाथस्वामिनः इन्द्राः स्वामिनो येषां ते सत्यनाथेन्द्रास्तच्छिष्या इति यावत्)। ते च ते कवीन्द्रश्च तैश्चाराध्ये सत्पदे यस्य सः कवीन्द्रसत्यनाथेन्द्रकवीन्द्रा-राध्यसत्पदः। सत्यनाथशब्दस्यावृत्तिः। कवीन्द्रसत्यनाथस्वामिभि-स्तच्छिष्यकवीन्द्रैश्च गुरुत्वेनाराध्यत्वं गुरुत्वं विना न सम्भवति अतः सर्वकवीन्द्रगुरुत्वं सिद्धम्। अयमेवार्थः-

स्वोपार्जितानां विद्यानां समूह इव मूर्तिमान्।
कवीन्द्रस्तस्य शिष्योऽभूत् धाम सारस्वतः श्रियः।
यमादत्त प्रीत्या स खलु समभूत्पण्डितवरः
स मूढोऽभूद् यश्च व्यसृजदयमीड्यो यतिवरः।
स लोकः सालोको भवति सविता यं वलयते
पराचीनो यस्मात् स भवति तमस्काण्डमलिनः।।(३.१७,१८)

इति सत्यनिधिविलासे उक्तः।। ८।।

वागीशं चिन्तये नित्यं वागीशसदृशं गुरुम्।
वागीशश्रीभारतीशवागीशश्रीशभावतः।। ९।।

नवमं वागीशगुरुराजं स्तौति- **वागीशमिति**।। अहं नित्यं वागीशश्रीभारतीशवागीशश्रीशभावतः। श्रीश्च भारती च श्रीभारत्यौ श्रीभारत्यौ च तदीशौ च श्रीभारतीशाः, वागीशाः वाक्प्रेरकाश्च ते श्रीभारतीशाः लक्ष्मीभारतीनारायणवायवश्च वागीशश्रीभारतीशाः, तेभ्यस्तेषां प्रसादेनेति यावत्। वागीशाः वाक्प्रवर्तकाः वागीश-श्रीभारतीशवागीशाः श्रीमन्तश्च ते ईशाः स्वामिनश्च श्रीशाः वागीशश्रीभारतीशवागीशाश्च ते श्रीशाश्च वागीशश्रीभारतीशवागीश-श्रीशाः सत्यनाथगुरवस्तेषां भावतः ध्यानतः वागीशं वागीशस्वामिनं चिन्तये। वागीशशब्दार्थत्वे निमित्तमाह- **वागीशसदृशमिति**।। बृहस्पतिसदृशम्। बृहस्पतिसादृश्यमुपपादयति- **गुरुमिति**।। बृहस्पतिर्देवानां गुरुः अयं तु भूदेवानां गुरुरिति बृहस्पतिसादृश्यम्।।९।।

रामचन्द्रगुरुं सेवे रामचन्द्रप्रसादजम्।
रामचन्द्रप्रसादेनरामचन्द्रप्रसादतः।।१०।।

दशमं रामचन्द्रगुरुं स्तौति- **रामचन्द्रगुरुमिति**।। अहं रामचन्द्रप्रसादेन रामचन्द्रप्रसादतः। रामचन्द्रस्य प्रसादो येषां ते रामचन्द्रप्रसादाः रामचन्द्रभक्ता इति यावत्। तेषामिना स्वामिनः श्रीसत्यनाथगुरवः तत्सम्पादितो यो रामचन्द्रप्रसादस्तस्मात्। उपलक्षणमेतत् । सत्यनाथस्वामिसम्पादितस्वगुरुसत्यनाथस्वामि-प्रसादाच्च, रामचन्द्रप्रसादाज्जातं रामचन्द्रगुरुं सेवे । 'रामचन्द्रप्रसादेन-रामचन्द्रप्रसादतः' इत्यनेन सर्वाणि रामचन्द्राराधनानि गुर्वाराधनानि च सत्यनाथस्वामिनां सङ्कल्पादेव भवन्ति। अतस्तज्जातो हरिगुरुप्रसाद-स्तेषामेव तेषां दययैवास्माकं सकलशुभावाप्तिरिति ध्यानं सर्वदा अस्माभिः क्रियते, भवद्भिरपि तथैव ध्यानं कर्तव्यमिति लोकान् शिक्षयति। गुरुसम्पादितहरिगुरुप्रसादेन सकलशुभावाप्तिर्भवतीत्येत-त्सर्वदा ध्येयमित्येतत् प्रमेयं तन्त्रसारे श्रीमदाचार्यैः-

शुभान् ध्यायन्ति ये कामान् गुरुदेवप्रसादजान्।
इतरानात्मपापोत्थान् तेषां विद्या फलिष्यति ।। (४.११५) इति

एतेन पापानां स्वसम्पादितत्वज्ञापनार्थं यथाऽऽत्मपापोत्थानित्युक्तम्। तथा गुरुदेवप्रसादजानिति वक्तव्यमिति दूषणं परास्तम्। गुरुदेवप्रसादजानित्यस्यात्मसम्पादितगुरुदेवप्रसादजानित्यर्थ इत्यङ्गीकारात्। जानन्तीत्यनुक्त्वा ध्यायन्तीत्युक्त्या विद्यमानमपि हरिगुर्वधीनाल्पकर्तृत्वं ध्येयं न भवति किन्तु ज्ञेयमिति सूचयति।। १०।।

विद्यानिधिमुनिं वन्दे विद्यानिधिमहानिधिम्।
विद्यानिधिग्रन्थकर्तृविद्यानिधिमहागुरुम्।। ११ ।।

एकादशं विद्यानिधिमुनिं स्तौति- **विद्यानिधिमुनिमिति ।।** अहं विद्यानिधिमहानिधिं विद्यायां प्रतिपाद्यतया भूगतनिक्षेपद्रव्यवत् रहस्यः सन् तिष्ठतीति भगवान् विद्यानिधिः अत्र विद्यानिधिशब्देन श्रीरामव्यासप्रतिमा गृह्यन्ते। विद्यानिधयः श्रीरामव्यासप्रतिमाः महानिधयः महानिक्षेपद्रव्यसदृशाः यस्य स विद्यानिधिमहानिधिस्तम् । विद्यानिधिग्रन्थकर्तृविद्यानिधिमहागुरुं, विद्यानिधिभगवन्माहात्म्यप्रतिपादकग्रन्थकर्तारश्च ते विद्यालक्षणनिक्षेपद्रव्यसम्पन्नाश्च विद्यानिधिग्रन्थकर्तृविद्यानिधयः श्रीसत्यनाथस्वामिनस्तेषां महागुरुं परमगुरुं विद्यानिधिमुनिं विद्यानिधिनामकं मुनिं वन्दे। 'विद्यानिधिमहानिधिम्' इत्यनेन वैकुण्ठयात्राकाले विद्यानिधिस्वामिनः समीपे नाभवन्। अतो रामचन्द्रस्वामिभिः संरक्षणार्थं श्रीरामव्यासप्रतिमाः मञ्जूषायां निक्षिप्य मञ्जूषां भूम्यन्तः स्थापयित्वा वैकुण्ठयात्रा कृता। अनन्तरं विद्यानिधिस्वामिभिरागत्य यदा श्रीरामव्यासस्तुतिः कृता तदैव श्रीरामव्यासयुक्तभूमिर्भिन्ना जाता। अनन्तरं भूमिगतनिक्षेपद्रव्यवत् श्रीरामव्यासप्रतिमाः स्वीकृत्य पूजा कृतेति ज्ञानिभिरुच्यमानां कथां सूचयति।। ११ ।।

रघुनाथगुरुः पायाद् रघुनाथपदार्चकः ।
रघुनाथविमानाप्तरघुनाथपदार्चकः ।। १२ ।।

द्वादशार्यं रघुनाथमुनिं स्तौति– रघुनाथगुरुमिति ।। रघुनाथपदार्चकः रघुनाथस्य पदे पूज्यतया वर्तेते येषां ते रघुनाथपदाः श्रीसत्यनाथ-स्वामिनस्त एवार्चका यस्य स तथोक्तः। रघुनाथविमानाप्तरघुनाथ-पदार्चकः। रघुनाथसम्बन्धि यद्विमानं तेनाप्ते प्राप्ते ये रघुनाथस्वरूप-नारायणपदे तयोरर्चकः। रघुनाथगुरुः पायात्। 'रघुनाथविमानाप्त-रघुनाथपदार्चक' इत्यनेन रघुनाथश्रीपादः रघुनाथापरोक्षज्ञानं सम्पाद्य रघुनाथप्रसादप्राप्तविमानमारुह्य वैकुण्ठं गत्वा नारायणपादपूजां सर्वदा करोतीत्युक्तं भवति। उपलक्षणमेतत् व्यासकूर्मार्चकः, मृतायाष्टपुत्रप्रदश्च इत्यपि द्रष्टव्यम्। इदं रघुनाथतीर्थमाहात्म्यम्–

समभूद्रघुनाथयतिस्तदनु प्रथयन् गुरुकीर्तिमुदारमनाः।
विकसद्हृदयाम्बुजकोशकुटीप्रकटीभवदिष्टमुकुन्दनिधिः।।

प्रशान्तकान्तानुगमोद्यता नता भवाष्टपुत्रेत्यनुमोदिता सती।
सुतानवापाष्ट धवेन जीवता दधेऽष्टपुत्राख्यमपि स्वमन्वयम्।।

गङ्गातीर्थमुदीक्षितुं जिगमिषुं तं जह्नुभान्वोः सुते
प्रत्यक्षं स्नपयाम्बभूवतुरुभे सौवर्णकुम्भाम्भसा।
अन्तर्धिं प्रययौ पुनर्जिगमिषौ व्यासाभिधैका शिला
ध्याता कच्छपरूपतां च जगृहे साध्यक्षदृष्टां जनैः ।।
विख्यातविज्ञानतपःप्रभावो गच्छन् विमानेन पदं मुरारेः।
श्रीपादराजाय बुभुत्सितार्थमचष्ट सङ्केतेऽङ्गुलिसञ्ज्ञया सः ।।

(३.२२–२५)

इति सत्यनिधिविलासवाक्यैः सिद्धम्।। १२ ।।

रघुवर्यगुरो देहि रघुवर्यपदार्चनम्।
रघुवर्यपदासक्तरघुवर्यार्चनप्रद।। १३।।

त्रयोदशं रघुवर्यस्वामिनं स्तौति- **रघुवर्यगुरो इति।।** हे रघुवर्यपदासक्तरघुवर्यार्चनप्रद । रघुवर्यः रामचन्द्रः, विघ्नपरिहारेण स्वार्चनप्रदः यस्मै तस्य सम्बुद्धिः रघुवर्यार्चनप्रद रघुवर्यगुरो, रघुवर्यपदार्चनं रघुवर्याणां भवतां पदं स्थानं येषां ते रघुवर्यपदाः श्रीसत्यनाथस्वामिनः तेषां अर्चनं देहि। 'रघुवर्यार्चनप्रद' इत्यनेन, सेनया सह कस्मिंश्चित् म्लेच्छनाथो देवतार्चापहारार्थं आगते सति रघुवर्यस्वामिभिः देवतार्चा गृहीत्वा शीघ्रं महापूरविशिष्टभीमरथीसमीपं प्रत्यागतं, तदा रामचन्द्रप्रसादेन भीमरथ्या एकपुरुषगमनानुकूलमार्गो दत्तस्तेन मार्गेण यदा रघुवर्यस्वामिभिः परतीरं प्रति गतं तदैव सेनासहितम्लेच्छनाथस्य भीमरथ्युदकेन मार्गनिरोधो जातः। अनन्तरं रामचन्द्रप्रसादेन श्रीरामचन्द्रपूजा परमसौख्येन कृतेति कथाविशेषः सूचितः। अयमेवार्थः-

अथ रघुवर्यतीर्थयतिराट् समभूत् किल यः ।
प्रथितयशःप्रभावविदिताशयः परितः।।
यवनचमूभयेन पुरतश्चलन्तोऽस्य सरित् ।
व्यदिशत वर्तनीमनुनिरुद्धचमूनिचया ।।(३.२६)इति

सत्यनिधिविलासे उक्तः।। १३ ।।

रघूत्तमगुरुर्दद्याद् रघूत्तमकथादरम्।
रघूत्तमग्रन्थजातरघूत्तमकथादृतः ।। १४।।

चतुर्दशं श्रीरघूत्तमगुरुं स्तौति- **रघूत्तमगुरुमिति।।** रघूत्तमग्रन्थ-जातरघूत्तमकथादृतः। रघूत्तममाहात्म्यप्रतिपादकभावबोधसञ्ज्ञितग्रन्थ-

जातं यस्मात् सः रघूत्तमग्रन्थजातः रघूत्तमस्य कथाः येषां ते रघूत्तमकथाः श्रीसत्यनाथस्वामिनः तैरादृतः। रघूत्तमग्रन्थजातश्चासौ रघूत्तमकथादृतश्च रघूत्तमग्रन्थजातरघूत्तमकथादृतः। रघूत्तमगुरुः रघूत्तमकथादरं रघूत्तमकथायां आदरं दद्यात्। रघूत्तमग्रन्थजातेत्येतत् अश्रुतशास्त्रव्याख्यातृत्वादेरुपलक्षकम्।

भावबोधकर्तृत्वादिरूपश्रीरघूत्तमस्वामिमाहात्म्यम्-

पण्डितंमन्यदुर्बोधानबाधान् प्रतियुक्तिभिः।
नानाविधान् भावबोधांश्चक्रे चक्रेषु स श्रुतः ॥
व्याख्याताश्रुतशास्त्रं तमनमदसहोऽपि वरदराजाचार्यः।
बहुलं तणीति वाक्ये सञ्ज्ञा तणिति विपरीक्ष्य कथयन्तम्॥

(३.२९,३०)

इति सत्यनिधिविलासे उक्तम्॥ १४॥

वेदव्यासगुरुं याचे वेदव्यासकृतागमम्।
वेदव्यासार्चनप्राप्तवेदव्याससमाश्रयम्॥ १५॥

पञ्चदशं वेदव्यासस्वामिनं स्तौति- **वेदव्यासगुरुमिति॥** वेदव्यासकृतागमं वेदव्यासेन कृताः पौरुषेयापौरुषेयागमाः यस्य तम्। वेदव्यासकृतपौरुषेयापौरुषेयागमव्याख्यातारम्। अपौरुषेयागमानां वेदव्यास- कृतत्वं नाम तद्व्यक्तीकृतत्वमिति द्रष्टव्यम्। वेदव्यासार्चन-प्राप्तवेदव्याससमाश्रयम्। वेदव्यासपूजनेन प्राप्तः वैकुण्ठस्थितवेदव्यासो येषां ते वेदव्यासार्चनप्राप्तवेदव्यासाः श्रीसत्यनाथस्वामिनः तेषां समाश्रयम्। यद्यपि श्रीसत्यनाथस्वामिभिर्वेदव्यासपूजावत् रामचन्द्रपूजापि कृता। तथापि नित्यं रत्नाभिषेकादिना वेदव्यासस्यैव पूजा कृतेति विशेषज्ञापनार्थं वेदव्यासपूजकत्वं विशिष्योक्तम्। वेदव्यासशब्देन

बदरिकाश्रमस्थितवेदव्यासनारायणौ गृह्येते। तयोरर्चनेन प्राप्ताः वेदव्यासाः वेदव्यासाष्टकवालुकप्रतिमाः यैः ते वेदव्यासार्चनप्राप्त-वेदव्यासाः श्रीमदाचार्याः त एव समाश्रयाः यस्य तमिति वा। वेदव्यासगुरुं याचे। बदरिकाश्रमस्थितवेदव्यासनारायणयोः पूजां कृत्वा वेदव्यासप्रतिमाः श्रीमदाचार्यैः सम्पादिताः इत्युक्त्या श्रीमदाचार्यैः बदरिकाश्रमं गत्वा, बदरीनारायणपूजां कृत्वा, लक्ष्मीनारायण सन्निधानविशिष्टबदरीनारायणदत्ताष्टवालुकप्रतिमाः गृहीत्वा, बदरिकाश्रम-स्थितवेदव्यासं प्रत्यागत्य वेदव्यासपूजा कृता। तदनन्तरं वेदव्यासेनापि ता एव प्रतिमाः स्वसन्निधानविशिष्टाः कृत्वा श्रीमदाचार्येभ्यो दत्ताः। अत एव लोके वेदव्यासप्रतिमा इति प्रसिद्धिः। अनन्तरं श्रीमदाचार्यैः बहुकालपर्यन्तं पूजां कृत्वा पञ्च व्यासप्रतिमाः पद्मनाभतीर्थेभ्यो दत्ताः। द्वे प्रतिमे ब्रह्मण्ये स्थापिते। मध्यवाटे एका प्रतिमा स्थापिता । याः प्रतिमाः पद्मनाभतीर्थेभ्यो दत्ताः। तासां पञ्चानां पूजा अस्मन्मठे सर्वदा महावैभवेन भवति इति प्रमेयविशेषः सूचितो भवति। श्रीमदाचार्यैः बदरीनारायणात् लक्ष्मीनारायणसन्निधानयुताप्रतिमाः प्राप्ताः इत्येतत्प्रमेयम्-

प्राप स नारायणतः शुद्धशिलात्मप्रतिमाः।
यासु स पद्मासहितो दोष्यहितः सन्निहितः ॥

(१०.२४) इतिमध्वविजये उक्तम्।

शिलात्मप्रतिमा इत्यत्र शिलाशब्देन वालुकरूपशिलाः ग्राह्याः। अत एव लोकाः 'मल्लमुट्टिगि' इति प्राकृतभाषया वेदव्यासप्रतिमाः व्यवहरन्ति। वेदव्याससन्निधाने वेदव्याससञ्ज्ञां प्राप्ताः प्रतिमाः। वेदव्यासादपि श्रीमदाचार्यैः प्राप्ताः इत्येतत् प्रमेयम् -

विचित्रार्थपदैर्भूष्यं गीताभाष्यं विधाय सः।
कृष्णायार्पयितुं प्राप नरनारायणाश्रमम् ॥

नारायणेन या दत्ता वेदव्यासाभिधाः शिलाः।
रेजे स ताभिरष्टाभिर्मूर्ताभिरिव सिद्धिभिः ।।(२.३९,४०) इति
सत्यनिधिविलासवाक्येन सूचितम्।। १५।।

विद्याधीशगुरो रक्ष विद्याधीशहरेः सम ।
विद्याधीशहरिप्राप्तविद्याधीशहरिप्रिय ।।१६।।

षोडशं विद्याधीशस्वामिराजं स्तौति- **विद्याधीशगुरो इति ।।** विद्याधीश । विद्याप्रवर्तकहरेः सिंहस्य सम, दुर्वादिलक्षणगजभङ्ग-हेतुत्वात्। रामरूपहरेः समेति वा। समुद्रनिमित्तककीर्तिमत्वात्। विद्याधीशहरिप्राप्तविद्याधीशहरिप्रिय। विद्याधीशस्वामिशिष्यो यः हरिः नरहरिआचार्यः तस्मात् प्राप्ता या विद्या तस्याः प्रवर्तकाः दुर्वादिगजभङ्गे सिंहसदृशाश्चेति सत्यनाथस्वामिनः विद्याधीशहरिप्राप्त-विद्याधीशहरयः तेषां प्रिय विद्याधीशगुरो रक्ष। रामरूपहरिसाम्योप-पादकसमुद्रनिमित्तककीर्तिमत्त्वम् -

यद्विद्रोहकृतौ नृपे खलतरे पुट्टाभिधेऽम्भोनिधेः
सेतुं गच्छति योजनत्रयमगात् पश्चात् सरस्वानिति।
विद्याधीशमहापराधकृदसौ स्वप्ने जनांश्चाब्रवीत्
तद्द्रोही यत एष मायिमतभाक् दूरं गतोऽस्मीत्यहम्।।
भूयः सागरसेतुदर्शनपरं पापिष्ठमावारयन्
योगैः स्वप्नदशादृशो बहुजनाः सिन्धुः समागादहो!।
यत् श्रीपादयशः प्रवक्तुमिह तत्सार्धं पुनर्योजनं
विद्याधीशयतीशमेनमनिशं वावद्मयहं श्रीपदम्।। (२.२९,३०)

इति श्रीसत्यनाथाभ्युदयगतश्लोकाभ्यां सिद्धम्।। विद्याधीशहरि-प्राप्तेत्यत्र नरहरीति वक्तव्ये हरीत्युक्त्या विद्याधीशस्वामिशिष्येषु सत्यनाथस्वामिगुरुषु नरहर्याचार्येषु नरहरिशब्दप्रवृत्तौ नरेषु हरित्वं निमित्तमिति सूचितम्। एतदेवाभिप्रेत्य सत्यनाथस्वामिभिः-

नरेषु हरिरेवायमिति यं विबुधाः जगुः ।
वादिनिर्जयकौशल्यं दृष्ट्वाचार्यं तमाश्रये ।।

इति नरहर्याचार्याणां स्तुतिः कृतेति ।।१६।।

श्रीमद्वेदनिधिं नौमि श्रीमद्वेदपरायणम् ।
श्रीमद्वेदपदाधीशश्रीमद्वेदपदाश्रयम् ।। १७ ।।

सप्तदशं वेदनिधिगुरुं स्तौति- **श्रीमद्वेदनिधिमिति ।।** श्रीमद्वेदपरायणं श्रीमन्तश्च ते वेदाश्च श्रीमद्वेदाः वेदशब्दः तद्व्याख्यानरूपशास्त्रोपलक्षकः । श्रीमद्वेदानां श्रीमद्वेदशास्त्राणां परायणं मुख्याश्रयम् । विशेषतो वेदशास्त्राभिज्ञमिति यावत् । श्रीमद्वेदपदाधीशश्रीमद्वेदपदाश्रयम् । वेदस्य पदानि यस्य स वेदपदः, वेदपदैर्वाच्य इति यावत् । श्रीमांश्चासौ वेदपदश्च श्रीमद्वेदपदः श्रीमद्वेदपदः नारायणः अधीशः यस्य सः श्रीमद्वेदपदाधीशः श्रीमद्वेदपदं वेदराज्यं येषां ते श्रीमद्वेदपदाः श्रीसत्यनाथस्वामिनः तेषां आश्रयः श्रीमद्वेदपदाश्रयः श्रीमद्वेदपदाधीशश्चासौ श्रीमद्वेदपदाश्रयश्च तं श्रीमद्वेदपदाधीशश्रीमद्वेदपदाश्रयम् । श्रीमद्वेदनिधिं नौमि । वेदनिधिस्वामिनां विशेषतो वेदशास्त्राभिज्ञत्वम्-

तस्याभवद्वेदनिधिर्यतीन्द्रः शिष्यो विशिष्यार्जितवेदशास्त्रः ।
यत्ख्यातिमाख्यात्यधुनापि बालसरस्वतीसूरिकृतो निबन्धः ।।
अन्या सन्न्यासवृत्तिस्ते श्रीमद्वेदनिधे गुरो ।
यतो युष्मत्पदासङ्गादुत्तमः पुरुषोऽभवत् ।। (३.३८,३९)

इति सत्यनिधिविलासश्लोकद्वयेन सिद्धम् । श्रीमद्वेदपदाधीशेत्यनेन वेदनिधिस्वामिनां विशेषतो वेदशास्त्राभिज्ञत्वे सर्ववेदप्रतिपाद्यनारायणानुग्रहः कारणमिति सूचितम् । श्रीमद्वेदपदाश्रयमित्यनेन श्रीमद्वेदनिधिस्वामिशिष्याणां सत्यनाथस्वामिनां वेदराज्यकर्तृत्वोक्त्या वेदनिधिस्वामिनां कैमुत्यन्यायेन वेदराज्यकर्तृत्वमुक्तं भवति ।। १७ ।।

सत्यव्रतगुरुं स्तौमि सत्यव्रतपरं परम्।
सत्यव्रतप्रसादाप्तसत्यव्रतमहागुरुम्॥ १८॥

अष्टादशं सत्यव्रतगुरुराजं स्तौति- **सत्यव्रतगुरुमिति॥** सत्यव्रतपरम्। सत्यो भगवान् तद्विषयाणि यानि व्रतानि तत्परम्। परं ज्ञानादिगुणपूर्णम्। सत्यव्रतप्रसादाप्तसत्यव्रतमहागुरुम्। सत्यानि व्रतानि जगत्सृष्ट्यादिकर्माणि यस्य सः सत्यव्रतः भगवान् तस्य प्रसादेन आप्तः प्राप्तः सत्यव्रतः सत्यव्रतश्रीपादः स्वयं यैः ते सत्यव्रतप्रसादाप्तसत्यव्रताः श्रीसत्यनाथस्वामिनः तेषां महागुरुं परमगुरुं सत्यव्रतगुरुं स्तौमि॥ सत्यव्रतस्वामिनां ज्ञानादिगुणपूर्णत्वम्-

सत्यव्रतं शिष्यमवाप विद्यातपोनिधिं वेदनिधिर्यतीन्द्रः।
कण्ठस्य भूषा विदुषां दिशां च शिरोमणिर्यस्य बभूव कीर्तिः॥

विचार्य निखिलागमान् समुपचर्य भक्त्या गुरून्
निवार्य सकलानरीनपि वितीर्य सद्भ्यो धनम्।
प्रभावविभवोज्वलामपि विसार्य कीर्तिं स्थिरां
पुरस्कृतयतिव्रतः स जयति स्म सत्यव्रतः॥(३.४१)

इति सत्यनिधिविलासश्लोकद्वयेन प्रतिपादितम्। 'सत्यव्रत' इत्यनेन भगवत्कर्तृकजगत्सृष्ट्यादिकर्मणां सत्यत्वोक्त्या मायावाद्युक्तं मिथ्यात्वं निराकृतं भवति। सत्यव्रतप्रसादाप्तसत्यव्रतेत्यनेन सत्यनाथस्वामि नां विशिष्य सत्यव्रतस्वामिप्राप्तिरुक्ता। तथा सत्यनाथस्वामिभिः सङ्गलिगीग्रामे स्थित्वा सत्यव्रतस्वामिवृन्दावनपूजां कृत्वा तत्प्रभावेन वैदिकमहासाम्राज्यं सम्पादितमिति सूचयति॥१८॥

सत्यनिध्यर्यमाशासे सत्यनिध्यर्यपूजकम्।
सत्यनिध्यर्यबुद्धीश सत्यनिध्यर्यपूजितम्॥ १९॥

परमगुरुं सत्यनिधिस्वामिश्रीपादशिखामणिं स्तौति– **सत्यनिध्यर्यमिति** ।। सत्यनिध्यर्यपूजकम्। सत्यनिक्षेपद्रव्यवत् रमादि- सर्वभक्ताश्रयत्वात् सत्यनिधिर्भगवान् तस्य तत्स्वामिकश्रीमदाचार्यादीनां च पूजकम्। सत्यनिधयः सत्यनिधिस्वामिनः अर्याः स्वामिनः तत्त्वोपदेष्टारः येषां ते सत्यनिध्यर्याः । श्रीमुष्णस्थितपूर्णबोधाचार्याद्याः त एव पूजकाः यस्य तमिति वा। सत्यनिध्यर्यबुद्धीशसत्यनिध्यर्य- पूजितम्। सत्यनिधिस्वामिषु तदर्येषु तत्स्वामिषु नारायणादिषु च बुद्धिः शुभा बुद्धिर्येषां ते सत्यनिध्यर्यबुद्ध्योऽस्मज्जनकाः सुमतिस्वामिनः तेषां ईशाः सत्यनिध्यर्यबुद्धीशाः, सत्यनिधयः सत्यनिधिस्वामिनः अर्याः स्वामिनो येषां ते सत्यनिध्यर्याः सत्यनिध्यर्यबुद्धीशाश्च ते सत्यनिध्यर्याश्चेति सत्यनाथस्वामिनः सत्यनिध्यर्यबुद्धीशसत्यनिध्यर्याः तैः पूजितं सत्यनिध्यर्यं सत्यनिधिस्वामिनमाशासे। सत्यनिध्यर्यपूजक- मित्यत्र 'सत्यनिधी'त्यनेन भगवतः सत्यनिक्षेपद्रव्यसादृश्योक्त्या मायावाद्यभिमतं कल्पितनिक्षेपद्रव्यसादृश्यं निरस्तं भवति। सत्यनिध्यर्यपूजकमित्यत्रोक्तं सत्यनिधिस्वामिनां तत्त्वोपदेष्टृत्वं तत्वोपदेशप्रकारश्च–

पद्भ्यामेव चरिष्णुः क्रियया परिशुद्धयाऽऽप्तवर्तिष्णुः।
हरिभक्त्या भ्राजिष्णुः श्रीमुष्णं प्राप रोचिष्णुः।
मज्जन् नित्यसरस्यां रज्जन् श्रीमुष्णनाथसेवायाम् ।
सज्जः सत्यनिधीन्द्रः सज्जनतारक्षणेऽवसत्तत्र।
तस्मिन् वैष्णवततये वितरन् सर्वस्वमस्पृहो भिक्षुः।।
सर्वस्ववर्षधवलितशारदवारिद इवाबभौ शुद्धः ।।
वितरणवशेन कर्णं विद्याविभवादकर्णमपि शेषम् ।
अजयत् सत्यनिधीन्द्रः स्वगुरु........(८.४–६)

(..... .... अत्र मूलमातृकायां पत्रमेकं लुप्तमनुभूयते । देवतागुर्वनुग्रहबलात् यदि अन्या मातृका लभ्यते तदा पुनः सम्पूर्णतया प्रकाशयिष्यते ।)

सत्यनिधिस्वाम्यादिविषयकशुभबुद्धित्वप्रतिपादनेन गुर्वादिविषयकशुभमतित्वात् सुमतय इति सुमतिशब्दार्थः उक्तो भवति। अनेन सुमतिस्वामिभिः संसारसुखं कुपिताहिफणच्छायासुखसमानं अतो हेयं हरिगुरुदययैव सम्पादनीया इत्येवं मनसा निश्चित्य मरीचिग्रामात् तिण्डीवननामकग्रामं गत्वा सत्यनिधिस्वामिनां प्रसादं सम्पाद्य सन्न्यासो गृहीतः। सत्यनिधिस्वामिभिः गुर्वादिविषयकशुभमतयः एते अतः तेषां सुमतितीर्थेति नाम उचितम् इति विद्वत्सभायामुक्त्वा सुमतितीर्थेति नाम स्थापितम्। भवत्पुत्रस्य संस्थानप्राप्तिर्भविष्यतीति भावेन जन्मान्तरे संस्थानप्राप्तिर्भविष्यतीति वरश्च दत्तः। सत्यनिधिस्वामिनां अमोघवरबलेन श्रीसत्यनाथस्वामिनां दयया सुमतिस्वामिपुत्रेण मया संस्थानं लब्धमित्यादिप्रमेयविशेषः सूचितः। 'सत्यनिध्यर्यबुद्धीश' इत्यनेन सुमतिस्वामिनां सत्यनाथस्वामिनः स्वामिन इति कथनेन सुमतिस्वामिभिः सत्यनाथस्वामिनां प्रसादोऽपि सम्पादितः । अतः सत्यनाथस्वामिनामाज्ञया कनकाभिषेकादिना सुमतिस्वामिनां बहुमानः मया कृतः। सुमतिस्वामिभिः कनकाभिषेकद्रव्येण वेदव्यासरत्नखचितसौवर्णपीठं कारितम्। यस्मिन् पीठे प्रतिदिनं द्विवारं वेदव्यासप्रतिमास्थापनं भवति। यत्र च श्रीसत्यनाथस्वामिनिजशिष्यसुमतिकृतेयं सेवेति तन्नाम लिखितमस्ति इत्यादिप्रमेयविशेषः सूचितः ।। १९ ।।

सत्यनाथगुरून् यामि सत्यनाथार्चकान् सदा।
सत्यनाथग्रन्थकर्तॄन् सत्यनाथपदाश्रयान् ।। २० ।।

साक्षाद्गुरून् श्रीसत्यनाथस्वामिश्रीपादराजाधिराजान् स्तौति- **सत्यनाथ- गुरून्यामीति**।। सदा सत्यनाथार्चकान् सत्यलोकस्य नाथाः श्रीमदाचार्याः तेषां अर्चकान् सत्यनाथग्रन्थकर्तृन् सत्यः जगन्नाथो नारायणः तन्माहात्म्यप्रतिपादकाभिनवचन्द्रिकाभिनव- ताण्डवाभिनवामृताभिनवगदादिबहुग्रन्थकर्तृन् सत्यनाथपदाश्रयान् सत्यनाथेति पदं येषां ते सत्यनाथपदाः। सत्यनाथेति नामजपकर्तार इति यावत्। तेषां आश्रयान् सदा सत्यनाथगुरून् शरणं यामि।। यद्यपि श्रीमदाचार्याणां सत्यलोकनाथत्वं भावि तथापि "एष्यत्तु निश्चितं यत्तदतीतत्वेन भण्यते" इति वचनानुसारेण निश्चितत्वात् सत्यलोकनाथत्वमुक्तम्।। २०।।

सत्यनाथगुरून् वन्दे सत्याभिनवसंस्तुतान्।
सत्यनिध्यर्पितप्राणान् सत्यशास्त्रविचक्षणान्।। २१।।

।।सत्यनाथगुरूनिति।। सत्याभिनवस्तुतानिति वक्तव्ये 'संस्तुतान्' इत्युक्त्या स्तुतौ न मम स्वातन्त्र्यं किन्तु स्तुतिरपि सत्यनाथस्वामिनां सङ्कल्पादेव भवति इति निश्चित्य सत्याभिनवः स्तुतिं करोति इति सूचयति। सत्यनिध्यर्पितप्राणानित्यत्र प्राणशब्दः देहादेरुपलक्षकः। अस्मदीयशास्त्रं भगवद्गुणानां जगतश्च सत्यत्वं प्रतिपादयति। न तु मायावादिशास्त्रवत् मिथ्यात्वमिति सूचयितुं सत्यशास्त्रविचक्षणानित्यत्र शास्त्रस्य सत्यार्थप्रतिपादकत्वमुक्तम्।। २१।।

सत्यनाथकृपापात्रसत्याभिनवरक्षकान्।
सत्यनाथगुरून् सेवे सत्येश्वरपदार्चकान्।। २२।।

।। सत्यनाथकृपापात्रेति।। अस्मान्विनाऽस्य गतिर्नास्ति अतोऽस्माभिरयं रक्षणीय इति विचार्य कृपया रक्षन्तीति सूचयितुं

सत्यनाथकृपापात्रसत्याभिनवरक्षकानित्यत्र सत्यनाथकृपापात्रेति सत्याभिनवस्य विशेषणमुक्तम्। अस्माभिः वेणीसागरयात्रार्थं वेणीसमीपं गत्वा वेणीतरणार्थं देवतार्चा गृहीत्वा बहुभिर्ब्राह्मणैः सह नावारोहणे कृते वायुवशात् जलप्रवेशेन नावोन्मज्जनेन सर्वनाशे प्रसक्ते स्वामिपादौ विहाय गतिर्नास्ति स्वामिपादावेव गती इति सत्यनाथस्वामिनां स्मरणे कृते सर्वेषां कुशलं जातम्। अनन्तरं वेणीसागरसङ्गमस्थलादर्शनेन महत्यां चिन्तायां स्वामिन एवास्माकं गतय इति सत्यनाथस्वामिनां स्मरणमात्रे कृते वृद्धब्राह्मणेनागत्य वेणीसागरसङ्गमस्थलप्रदर्शनं कृतम्। अनन्तरं स वृद्धब्राह्मणोऽदृश्यो जात इत्याद्यद्भुतमाहात्म्यविशेषसूचनार्थं च सत्यनाथकृपापात्रेति विशेषणमुक्तम्। सत्येश्वरपदार्चकानित्यनेन सत्यभामेश्वरश्रीकृष्ण-पूजकत्वोक्त्या सत्यनाथस्वामिनां सङ्कल्पादेव रजतपीठक्षेत्रे किञ्चिन्न्यूनवर्षद्वयपर्यन्तं वासो जातः। नाना(वैभ)वेन नानाविधश्रीकृष्ण-पूजा च जातेति सूचयति।। २२।।

सत्यनाथगुरुस्तुत्या सत्याभिनवशब्दया।
सत्यनाथहरेः प्रीत्या सत्यनाथपदं भवेत्।। २३।।

सत्यनाथगुरुस्तोत्रपाठादेः फलमाह- **सत्यनाथगुरुस्तुत्येति।।** सत्याभिनवशब्दया सत्याभिनवेति शब्दा यस्यासौ सत्याभिनवशब्दः सोऽस्यास्तीति सत्याभिनवशब्दाः। ''अर्शआदिभ्योऽच्'' इति मत्वर्थेऽच्प्रत्यये कृते सत्याभिनवशब्देति रूपं तया सत्याभिनवशब्दया सत्याभिनवशब्दवाच्यसत्याभिनवयतिकृतयेति यावत्। सत्यनाथगुरु-स्तुत्येत्यतःपरं जातयेति शेषः। सत्यनाथस्वामिनां तद्गुरूणां श्रीमदाचार्यादिसत्यनिधिश्रीपादान्तानां च स्तुत्या जातया सत्यनाथहरेः सत्यनाथस्वाम्यन्तर्गतसीतासमेतरामव्यासादिरूपहरेः प्रीत्या सत्यनाथपदं

योग्यानां सत्यनाथस्वामिनां संस्थानं अन्येषां सत्यनाथस्वामिनां भूवैकुण्ठमठरूपस्थानं प्राप्तं भवेत्, अनन्तरं सत्यनाथशब्दवाच्य-नारायणस्य वैकुण्ठादिस्थानं प्राप्तं भवेत्। सत्यनाथगुरुस्तुत्येत्यत्र गुरुशब्देन सत्यनाथस्वामिनां प्राप्तत्वेऽपि सत्यनाथस्वामिनां स्तुतिः सर्वलोकेषु वर्तते इति ज्ञापनार्थं सत्यनाथेति पृथगुक्तिः। सत्याभिनव-जातया इति वक्तव्ये सत्याभिनवशब्दयेत्युक्त्या सत्यनाथगुरुस्तुतिरपि श्रीसत्यनाथस्वामिसङ्कल्पादेव जाता, सत्याभिनवः कर्तेति शब्दमात्रमिति सूचयति॥ २३॥

सत्यनाथगुरुस्तोत्रं व्याख्यातं यदनुग्रहात्।
सत्यनाथगुरून्वन्दे सत्यनाथकृपाकरान्॥

इति श्रीमदश्रुतपदवाक्यप्रमाणव्याख्यातॄणामभिनवचन्द्रिकाभिनव-ताण्डवाभिनवगदाभिनवामृतादिबहुग्रन्थकर्तॄणां जगत्पूज्यपादुकानां श्रीसत्यनाथश्रीपादानां शिष्येण सत्याभिनवयतिना कृता सत्यनाथ-गुरुस्तुतिटीका गुरुमाहात्म्यप्रकाशिका समाप्ता॥

॥ श्रीसत्यनाथगुर्वन्तर्गतरामव्यासार्पणमस्तु॥

॥ श्रीसत्याभिनवतीर्थगुरुभ्यो नमः॥ श्रीराम॥

॥श्रीकृष्णार्पणमस्तु॥

सत्यनाथगुरून् वन्दे सत्याभिनवसंस्तुतान्।
सत्यनिध्यर्पितप्राणान् सत्यशास्त्रविचक्षणान्।।